CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S. D. P. 13
Coll. No. 163

Title Evakāravāda

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 163 Subject: ?

Title: Ekavrda (?)

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 10·3"x4·5 Extent: Roll 10.

Language: Sanskrit. Script: Devanagari

Remarks: Incomplete Ends of [illegible]

ए.वा.
१

॥ श्रीगणेशाय नमः ॥ एवकारस्यात्यंतायोगायोगान्ययोगानां प्रत्येकं व्यवछेदोऽर्थः ॥ त
त्र नीलं सरोजं भवत्येवेत्यादौ सर्वत्र क्रियासंगतैवकारस्थलेऽत्यंतायोगव्यवछेदोऽर्थः ॥
शंखः पांडर एवेत्यादौ सर्वत्र विशेषणसंगतैवकारस्थलेऽयोगव्यवछेदोऽर्थः ॥ पार्थ एव
धनुर्धर इत्यादौ सर्वत्र विशेष्यसंगतैवकारस्थलेऽन्ययोगव्यवछेदोऽर्थः ॥ इत्थं चैवकारेणा
त्यंतायोगव्यवछेदबोधने एवकारस्य क्रियासंगतत्वं तन्त्रं ॥ अयोगव्यवछेदबोधने विशे
षणसंगतत्वं नियामकमुक्तं ॥ अथात्यंतायोगव्यवछेदस्थले नीलं सरोजं भवत्येवेत्या
दौ नीलत्वभवनायोगव्यवछेद एवार्थः ॥ अन्यस्य दुर्वचत्वात् ॥ तथा चात्यंतायोगव्यव
छेदायोगव्यवछेदयोरभेदापत्त्या कथं एवकारस्य शक्तित्रयं इति चेत् ॥ सत्यं ॥ य एवायो
गव्यवछेदः ॥ स एवात्यंतायोगव्यवछेदः ॥ परं तु एकस्यैवात्यंतायोगव्यवछेदायोगव्य

राम
१

वछेदरूपपरिभाषाभेदमात्रं ॥ यत्र चान्वयितावछेदकसामानाधिकरण्यमात्रेणायोग
व्यवछेदं प्रतीयते ॥ नीलं सरोजं भवत्येवेत्यादौ ॥ तत्रात्यंतायोगव्यवछेदपरिभाषा ॥ यत्र
चान्वयितावछेदकसामानाधिकरण्यमात्रेणा नायोगव्यवछेदः प्रतीयते शंखः ॥ पांडर
एवेत्यादौ तत्रायोगव्यवछेदपरिभाषा ॥ नचैकस्य परिभाषाभेदकरणे प्रयोजनाभावः ॥ स्व
तंत्रेछावतां तांत्रिकाणां तादृशपरिभाषाकर्तॄणां नियोगपर्यनुयोगानर्हत्वात् ॥ तथा चैवका
रस्यायोगव्यवछेदान्ययोगव्यवछेदयोः शक्तिद्वयमेव ॥ न तु शक्तित्रयमिति ॥ इत्थं च नीलं
सरोजं भवत्येवेत्यादौ क्रियासंगतैवकारस्य कार्यतावछेदकंभवस्वरूपसंबंधेन ॥ नी
लत्वभवनायोगव्यवछेदप्रकारकसरोजत्वविशिष्टविशेष्यकशाब्दत्वं ॥ एवं शंखः पांडर
एवेत्यादौ विशेषणसंगतैवकारस्य शंखत्वव्यापकत्वविशिष्टस्वरूपसंबंधेन पांडरत्वा

यैनि

ए॰ वा॰
२

करांख

योगव्यवच्छेदप्रकारत्वावच्छिन्नविशेष्यकशाब्दत्वं कार्यतावच्छेदकं ॥ एवं पार्थ एव धनुर्धर इ
त्यादौ विशेष्यसंगतैवकारस्य पार्थत्वविशिष्टविशेष्यकपार्थत्वव्याप्यधनुर्धरत्वसमाना
धिकरणविशेषणतासंबंधेन ॥ धनुर्धरान्ययोगव्यवच्छेदप्रकारकशाब्दत्वं कार्यताव
च्छेदकं तेन पार्थ एव द्रव्यमित्यादौ न प्रयोगः ॥ पार्थत्वव्याप्यतायाः द्रव्यत्वेनोक्तरीत्या सं
बंधत्वाभावात् ॥ यद्वा विशेष्यसंगतैवकारस्य पार्थान्यविशेष्यकधनुर्धरत्वासंतान्या
वप्रकारकशाब्दत्वं ॥ पार्थान्यविशेष्यकधनुर्धरभेदप्रकारकशाब्दत्वं वा ॥ तथा एवं पृथि
व्यामेव गंध इत्यादौ ॥ एवकारस्य गंधविशेष्यकपृथिव्यन्यसमवेतत्वव्यवच्छेदप्रकारक
शाब्दत्वं ॥ न च पृथिव्यामेव गंध ॥ इत्यादिवत् पृथिव्यामेवाकाश इत्यादिकथं न प्रयोगः
गंधादाविवाकाशेपि पृथिव्यन्यसमवेतत्वव्यवच्छेदसत्त्वादिति वाच्यं ॥ एवकारजन्य

राम
२

तद्बोधानां नियतभावान्वयविषयकत्वेन भावान्वयबोधसामग्रीजन्यत्वमापद्यते भावा
न्वयसामग्री च गंधादौ पृथिवीसमवेतत्वादिबोधसामग्रीमात्रं पृथिव्यामेवाकाशमित्या
दौ नास्त्येवाकाशे पृथिवीसमवेतत्वस्यायोगात् ॥ यदाकाशे पृथिवीसमवेतत्वप्रका
रकशाब्दसामग्री तदा भवत्येव पृथिव्यामेवाकाशमित्यादिवाक्यादन्वयबोधः ॥ न च
तादृशभावान्वयबोधसामग्रीविरहकाले केवलव्यवच्छेदान्वयबोधस्तत्र स्यात् ॥ तत्
सामग्रीसत्त्वादिति वाच्यं पृथिव्यामेव गंध इत्यादौ ॥ एवकारस्य गंधविशेष्यकपृथिवी
समवेतत्वप्रकारकत्वे सति गंधविशेष्यकपृथिव्यन्यसमवेतत्वव्यवच्छेदप्रकारक
शाब्दत्वं कार्यतावच्छेदकं इति भावान्वयबोधसामग्र्या व्यवच्छेदबोधं प्रति व्यापकसा
मग्री विषयाहेतुत्वात् ॥ न च पृथिव्यामेव गंध इत्यादौ योग्यतात्वमादिदशायां पृथिव्य

ए॰ वा॰
२

न्यसंयुक्तत्वव्यवच्छेदपृथिवीसंयुक्तत्वोऽन्वयप्रकारकशाब्दबोधापत्तिरितिवाच्यं ॥ सत्सम्पाः
संयुक्तत्वतात्पर्यादिदशायां इष्टापत्तेः ॥ संयुक्तत्वतात्पर्यकसप्तमीपदसमभिव्याहृत
पृथिवीपदसमभिव्याहृतैवकारस्य पृथिवीसंयुक्तत्वपृथिव्यन्यसंयुक्तत्वव्यवच्छेदबो
धप्रकारकशाब्दबोधादीनां कार्यतावच्छेदकत्वात् ॥ एवं समवेतत्वतात्पर्यकसप्तमी
पदसमभिव्याहृतपृथिवीपदसमभिव्याहृतैवकारस्य पृथिवीसमवेतपृथिव्यन्यसम
वेतत्वव्यवच्छेदोऽन्वयप्रकारकशाब्दत्वं कार्यतावच्छेदकं ॥ एवमन्यदप्यूह्यं पृथिवीसं
युक्तत्वपृथिव्यन्यसमवेतत्वव्यवच्छेदप्रकारकान्वयबोधश्च तत्र नांगीक्रियते अननुभव
विरोधात् न च जातिमत्त्वैं त्वादौ जातिमदन्यस्मिन् एकार्थसमवायादिसंबंधेन सत्तायाः
सत्त्वेन जातिमदन्यसमवेतत्वव्यवच्छेद एवार्थस्तस्य चाप्रसिद्धिः ॥ जातिमदन्यत्वविशि

वसत्ते॰ २

राम
२

ष्टसमवेतत्वस्याप्रसिद्धेरितिवाच्यं ॥ अत्र हि सत्तापदेन लक्षणया सत्ताधिकरणत्वमेवार्थः
॥ प्रतीयते तथा च सत्ताधिकरणत्वे जातिमदन्यवृत्तित्वव्यवच्छेदः ॥ वृत्तिश्चाधिकरणता
यस्वरूपसंबंधावच्छिन्नाग्राह्या तेन सत्ताधिकरणत्वस्य कालिकसंबंधेन जातिमदन्य
स्मिन् ध्वंसप्रागभावादौ वृत्तावपि न क्षतिः ॥ दीधितिकृतस्तु ॥ जातिमत्स्वेवसत्तात्वा
दौ समवेतीत्यध्याहार्यं ॥ तथा च सत्तासमवाये जातिमदन्यवृत्तित्वव्यवच्छेद एवार्थः ॥
सत्तासमवायो न दैशिकस्वरूपसंबंधेन जातिमदन्यस्मिन् इति नोक्तदोषः ॥ यद्वा
सत्तासमवाये जातिमदन्यानुयोगिकत्वव्यवच्छेद एवार्थः ॥ न च समवायस्य कालिक
संबंधेन जातिमदन्यस्मिन् वर्त्तमानत्वेन जातिमदन्यानुयोगिकत्वमिति स एव दोषः
अत्र कालिकसंबंध एव जातिमदन्यानुयोगिकत्वं ॥ न तु सत्तासमवाये तस्य जातिम

योगित्वस्यैव तत्र स्वीकारात् तथैव तत्तदधिकरणानुयोगिकत्वप्रतीतेस्तत्तदधिकरणानुयोगि २

ए॰ वा॰
४

दभ्यस्मिन् पदार्थान्तरसंबंधत्वाभावात् ॥ यत्राधिकरणे पदार्थान्तरस्य यः संबंधस्तदनु
योगिकत्वं च तत्तदधिकरणवृत्तित्वातिरिक्तत्वेन प्रतीयमानं स्वरूपसंबंधविशेषो निरि
क्तं विसम्वदेतत् ॥ न च जातिमत्येव सत्त्वेत्यादौ सत्तायाः प्रथमान्तपदोपस्थाप्यत्वेन का
र्त्तया समवेतीत्याख्यातार्थ ॥ प्रतियोगित्वं भासते न तु धात्वर्थसमवायविशेषणत
या भासते तथा सति चैत्रः पचतीत्यादौ चैत्रादेः कर्तुरपि धात्वर्थपाकादौ विशेषण
तया प्रत्ययप्रसंगात् इति वाच्यं ॥ एवकारसमभिव्याहारनियंत्रितस्तु तत्र विशेषस्वां
गीकारादित्थं च ॥ जातिमत्येव सत्त्वेत्यादौ सत्तया निरूपितत्वमित्यर्थः ॥ तथा च सत्ता
जातिमन्निरूपितसमवायप्रतियोगिनी सत्तासमवाये जातिमदनुयोगिकत्वव्य
वच्छेदश्चेति ॥ भावाभावान्वयविषयकसमूहालंबनबोधः ॥ एवमन्यत्राप्यूह्यमिसा

राम
४

म

कः ॥ ज्ञानमर्थग्रहणात्येवेत्यादौ ग्रहधातोर्विषयत्वमर्थः ॥ आख्यातस्याश्रयत्वं निरूपित
त्वं द्वितीयार्थः ॥ तथा च ज्ञानमर्थनिरूपितविषयित्वाश्रयत्ववत् ॥ अर्थनिरूपितविषयि
त्वाश्रयत्वायोगव्यवच्छेदवच्चेत्यन्वयबोधः ॥ अत्र चायोगव्यवच्छेदान्वयित्वतावच्छेदक
ज्ञानत्वावच्छेदेन प्रतीयते ॥ न तु सामानाधिकरण्यमात्रेण प्रथमान्तज्ञानपदसमभिव्या
हृतग्रहधातुसमभिव्याहृताख्यातसमभिव्याहृतैवकारत्वजन्योपस्थिते ॥ ज्ञानत्वनि
ष्ठावच्छेदकत्वाच गास्यार्थनिरूपितविषयित्वायोगव्यवच्छेदप्रकारकशाब्दत्वस्य का
र्यतावच्छेदकत्वात् ॥ न चेत्थं कार्यकारणभावे मानाभावः ॥ तथा सति ज्ञानं रजतं गृह्णात्ये
वेत्यादावपि ज्ञानत्वसामानाधिकरण्यमात्रेणायोग्यतादिशालिनो रजतविषयित्वा
श्रयत्वायोगव्यवच्छेदस्य प्रत्ययप्रसंगात् न चेष्टापत्तिः ॥ अनुभवविरोधात् ॥ यदा च ज्ञा

यित्वाश्र

ए॰वा॰
५

नत्वावच्छेदेन रजतनिरूपितविषयत्वायोगव्यवच्छेदबोधसामग्री तदाभवत्येव ॥ ज्ञानं
रजतं गृह्णात्येवेत्यादौ शाब्दभ्रमः ॥ एवं नरो वेदानधीत एवेत्यादौ नरत्वसामानाधिकर
ण्यमात्रेण वेदकर्मकाध्ययनकर्तृत्वायोगव्यवच्छेदबोधवारणायाध्ययनार्थकधातुस
मभिव्याहृतैवकारजन्योपस्थितेरन्वयितावच्छेदकीभूतनरत्वादिनिष्ठावच्छेदक
ताविशिष्टाध्ययनकर्तृत्वायोगव्यवच्छेदप्रकारकशाब्दत्वं कार्यतावच्छेदकं ॥ नरत्व
सामानाधिकरण्येनाध्ययनकर्तृत्वस्य योग्यत्वेपि योग्यताभ्रमदशायां नरत्वावच्छे
देन तादृशाध्ययनबोधदर्शनेन कार्यतावच्छेदकप्रसिद्धिः ॥ तथाविधयोग्यतांशे
भ्रांतस्य तादृशान्वयबोधस्तु भ्रम एव ॥ द्विजो वेदानधीत एवेत्यादौ तु द्विजत्वावच्छेदे
न वेदकर्मकाध्ययनकर्तृत्वायोगव्यवच्छेदस्याबाधितत्वाद् भ्रांतस्यैव द्विजत्वादिनि

राम
५

ष्ठावच्छेदकत्वावगाह्यभ्रांतो बोधः ॥ ज्ञानेनार्थो गृह्यत एवेत्यादौ तु ग्रहनिष्ठधातो विषय
त्वं तृतीयायाश्च निरूपितत्वं कर्माख्यातस्याश्रयत्वमर्थस्तथा चार्थो ज्ञाननिरूपितविष
यिताश्रयत्वायोगव्यवच्छेदवानित्यन्वयबोधः ॥ वस्तुरूपं गृह्णात्येवेत्यादौ ग्रहधातो
र्ज्ञानमर्थः ॥ द्वितीयाया विषयत्वं आख्यातस्य [illegible]जनकत्वमर्थः ॥ तथा वस्तुरूपविषयक
ज्ञानजनकं चक्षुरित्यन्वयबोधः ॥ इत्थं च ग्रहधातो विषयत्वं विषयित्वं ज्ञानं च त्रयमेवा
र्थः ॥ शक्तिर्न सर्वत्र क्वचिच्छक्तिः ॥ क्वचिन्निरूढलक्षणा वेत्यन्यदेतत् ॥ ज्ञानं रजतं गृह्णात्ये
वेत्यादिस्तु प्रयोगो भवत्येव ॥ यदि च न भवति तदा ज्ञानेनार्थो गृह्यत एवेत्यादौ ज्ञानत्वा
क॰ वच्छेदेनार्थग्राहकत्वायोगव्यवच्छेदो ऽर्थो वाच्य इति ॥ ज्ञानेन रजतं गृह्यत इत्यादौ ज्ञान
त्वावच्छेदेन रजतत्वप्रकारक[illegible]कत्वायोगव्यवच्छेदबोधस्यासंभवेन तथाविधप्रयोगो न

ए॰ वा॰
६

भवति॥ योग्यतादिभ्रमे तु भवत्येव॥ अत्र यद्यपि प्रथमोक्तपदेनोपस्थाप्य मुख्यविशेष्यक
तायाः संसर्गिकत्वेनार्थविशेष्यकान्वयबोध एव भवितुमर्हति न तु ज्ञानविशेष्यकस्त
थाप्येवकारसमभिव्याहृतनियंत्रितत्वस्त्विति नेदं महिम्ना॥ तादृशबोधो भवतीति ध्येयं
अत्र एवकारेणार्थग्राहकत्वायोगव्यवच्छेदबोधनेऽर्थग्राहकत्वबोधकवाक्यसमभि
व्याहृत॥ एवकारजन्योपस्थितित्वेन हेतुतावच्छेदकं वाच्या॥ अन्यथा नीलं सरोजं भवत्ये
वेत्यादावर्थग्राहकत्वायोगव्यवच्छेदबोधप्रसंगात्॥ तथा च ज्ञानेनार्थो गृह्यत एवे
त्यादौ तादृशसमभिव्याहाराभावात्॥ कथमेवकारात्॥ तादृशबोध इति चेत्॥ सत्यं
एवकारशक्त्या तादृशान्वयबोधं प्रति तादृशवाक्यसमभिव्याहृतएवकारजन्योपस्थि
तेर्हेतुत्वात्॥ नीलं सरोजं भवत्येवेत्यादौ एवकारशक्त्या नार्थग्राहकत्वायोगव्यवच्छे

राम
६

दबोधः॥ यत्र चैवकारेऽर्थग्राहकत्वायोगव्यवच्छेदादौ लक्षणा क्रियते तदानपेक्षितमेवा
र्थग्राहकत्वबोधकवाक्यसमभिव्याहृतत्वमेवकारस्येति नापत्तिः॥ रूपं पृथिव्यां वर्त्तत
एवेत्यादौ सप्तम्या निरूपितत्वं धात्वर्थो वृत्तिः॥ आख्यातस्याश्रयत्वं तथा च॥ पृथिवीनिरू
पितवृत्त्याश्रयत्वायोगव्यवच्छेदवदित्यन्वयबोधः॥ अत्र च रूपत्वसमानाधिकरणे
मात्रेणान्वयबोधः॥ रूपेण पृथिवी व्यावृत्त्यत एवेत्यादावपि रूपे पृथिवीनिरूपित
धात्वर्थ॥ व्यावृत्त्ययोगव्यवच्छेदः प्रतीयते॥ एवं आत्मनैव ज्ञायते इष्यते क्रियते इत्या
दौ ज्ञानादेरात्मान्यवृत्तित्वव्यवच्छेदात्॥ ज्ञानादावात्मवृत्तित्वायोगव्यवच्छेदस्याप्रती
यते तात्पर्यभेदात्॥ न चैवकारेण तादृशवृत्तित्वादिव्यवच्छेदबोधने वृत्तिमात्र
त्वोपस्थापकविभक्तिसमभिव्याहृतएवकारस्य हेतुत्वेति तदभावात् कथं तादृ

ए. वा.
७

शान्वयबोधइतिवाच्यं तृतीयायाएवतन्निमित्तोपस्थापकत्वात् नचआत्मानैने
वपरिछिन्नायतइतिप्रयोगःस्यात्परिमाणत्वावछेदेनात्मवृत्तित्वायोगव्यवछेदस्या
सत्वात् अनुत्पन्नस्यात्रधात्वर्थतावछेदकज्ञानत्वावछेदेनैतादृशाव्यवछेदबोधः ए
वंकृतौस्वदारानृगछेदेवत्याद्यौसत्तम्यर्थोऽवछिन्नत्वं एवकारार्थस्त्वायोगव्यव
छेदःविध्यर्थश्चइष्टसाधनत्वं इष्टंचप्रत्यवायाभावरूपमित्तीयार्थः कर्मतान
याचऋतुकालावछिन्नस्वदारकर्मकमैथुनानभिगमनायोगव्यवछेदःप्रत्यवायाभा
वसाधनमित्यन्वयबोधः एवकारसमभिव्याहृतविधिप्रत्ययार्थस्यमकृत्यर्थेएव
कारार्थेऽन्वेतिव्युत्पत्तिभेदात् नचैतावतानभिगमनस्यप्रत्यवायाभावहेतुत्वेप्य
नभिगमनाभावस्यप्रत्यवायहेतुतानस्यात् एकजातीयफलजनकषोडश्यग्रहण

राम
७

वेद

एवत् ॥ अनयोरपिप्रत्यवायाभावहेतुत्वसंभवात् इति ॥ यस्यायोगव्यवछेदंप्रत्यवा
याभावहेतुत्वेनबोधितःसप्रत्यवायजनकाभावप्रतियोगीतिव्याप्तिबलेनतादृशा
नभिगमनाभावस्यप्रत्यवायहेतुत्वसिद्धेः ॥ तत्रचऋतुकालावछिन्नस्वदारकर्मकानभि
गमनाभावस्यसामानाधिकरण्येनसंबंधेनप्रत्यवायहेतुत्वंवक्तव्यं ॥ तथाचयस्यां
कस्यांचित्तिथौवाभिगंतुः ॥ पुरुषस्यकृत्वंतरेऽनभिगमनाभावेपिप्रत्यवायोनस्यात् ॥ य
दिचतत्तदृतुकालावछिन्नतत्तद्दारकर्मकतत्तत्पुरुषकर्तृकानभिगमनाभावत्वेनतत्त
त्पुरुषीयप्रत्यवायविशेषंप्रतिहेतुत्वमुच्यतेतदानृतावप्रियस्यपुरुषस्यानभिगमनप्र
सिद्धं ॥ तत्रप्रतियोगिनोऽप्रसिद्ध्याऽनभिगंतुः ॥ प्रत्यवायोनस्यात् ॥ अत्रवदंति ॥ तत्तदृतु
कालावछिन्नतत्तद्दारकर्मकस्यतत्तत्पुरुषकर्तृकत्वेनयाभाववदनभिगमनसामान्य

ए॰ वा॰
८

क्ष्यते तेमनमित्यादौ एतद्भवनवृत्तितेमनत्वसामानाधिकरण्यमात्रेण मैत्रप ४

स्यतत्तत्पुरुषीयतादृशप्रत्यवायं प्रति हेतुतेति विशेष्यभेदेन पुरुषभेदेन च कार्यकार
णभावकल्पनात्॥ अस्तु वा तत्तत्कालावच्छिन्नदारादीनामभिगमनसंबंधावच्छिन्नप्र
तियोगिताकाभावस्तत्तत्पुरुषीयविलक्षणप्रत्यवायहेतुरिति॥ इह भवने मैत्रेणैव प
च्यमानत्वायोगव्यवच्छेदोऽर्थः॥ तथा यत्र भवने चैत्रेणान्नं पच्यते तेमनं तत्रापि नयोगः
स्यात्॥ न चैतद्भवनवृत्तितेमनत्वावच्छेदेन मैत्रपच्यमानत्वायोगव्यवच्छेदः॥ यत्र
भवने मैत्रेणैव तेमनं पच्यते अस्य च स्वजांतरे पच्यमानतेमनस्य तत्रानिष्यमाण
तात्तत्र तादृशप्रयोगाभावप्रसंगात्॥ न चैतद्भवनवृत्तिपाकत्वावच्छेदेन मैत्रक्रियमा
णत्वायोगव्यवच्छेदः॥ यत्र भवने चैत्रेणान्नं पच्यते मैत्रेण तेमनं पच्यते न च तादृशप्र
योगाभावसंभवात्॥ न चैतद्भवनावच्छिन्नतेमनपाकत्वावच्छेदेन मैत्रपच्यमानत्वा
योगव्यवच्छेदः एतद्भवनावच्छिन्नतेमनकर्मकपाकत्वावच्छिन्नस्य प्रकृतवाक्यादबोधात् तेमनस्य प्रथमांतप
दोपस्थाप्यत्वेन कर्मत्वविशेषणत्वेनोपस्थितत्वाभावात्। न च भवनपदोत्तरसप्तम्या उत्पत्तिरर्थः। तथा चैतद्भ

राम
८

वनोत्पत्तिकतेमनत्वावच्छेदेन मैत्रपच्यमानत्वा
योगव्यवच्छेदः॥ यत्र भवने चैत्रेण मैत्रेण च मिलित्वा पच्यते तत्रापि तादृशप्रसंगात्॥ मैवं एत
द्भवनोत्पत्तिकतेमनत्वावच्छेदेन मैत्रान्यपच्यमानत्वायोगव्यवच्छेदस्यैवात्र प्रतिपाद्यत्वा
दिति केचित्॥ लक्षणाया मैत्रान्यस्मिन् तत्रत्यतेमनकर्मकपाकानुकूलकृतिव्यवच्छे
दः प्रतीयते इत्यपरे॥ चैत्रो भजनमेव कुरुते इत्यादौ भजने चैत्रकर्तृत्वायोगव्यवच्छेदोऽर्थः॥
८ अन्नं भोजयतो करि चैत्रे तादृशप्रयोगप्रसंगात्॥ किंतु चैत्रो भजनान्यभोजनकर्तृ
त्वव्यवच्छेदवान्॥ भजनकर्मकभक्षणकर्तृत्ववांश्चेति॥ अत एव भजनमात्रं कुरुते इत्यनेन त
स्य प्रयोगस्य समानार्थकत्वं॥ एवं चैत्रः पायसस्यैव भोक्तेत्यादौ चैत्रे पायसान्यभोक्तृ
भेदः॥ पायसस्य भोक्ता च विशेषणं तया तादात्म्येन प्रतीयते॥ ज्ञानमर्थग्राहकमि
त्यादावपि अर्थग्राहकान्ययोगव्यवच्छेदोत्तरजनादौ प्रतीयते अन्ययोगस्यान्यता।

दात्म्यमेवतेनार्थग्राहकान्यस्मिन्नकर्मादौ ज्ञानादेः ॥ कालिकादिसंबंधात्मकयोगसत्वे ।
पिनस्तातिः ॥ यदिचतादात्म्योपस्थापकसमभिव्याहृततादृशप्रत्ययेपि एवकारेणान्य
तादात्म्यव्यवच्छेदबोधनेऽर्थग्राहकत्वेनेव ज्ञानवानित्यादौ तादात्म्योपस्थापकतृतीया
देर्हेतुत्वकल्पनात् ॥ तदा शंखः पांडर एवेत्यादिवदर्थग्राहकान्यव्यवच्छेद एवार्थोस्तु
एवंशीतस्पर्शवस्पर्शस्य जलवृत्तित्वमित्यादौ जलवृत्तित्वे शीतान्यस्पर्शवृत्तित्वव्यवच्छे
दः प्रतीयते ॥ एवमन्यदूह्यमितिदिक् ॥ नव्यास्तु एवकारस्यान्ययोगव्यवच्छेद एव शा ।
क्तिस्तत्र चान्ययोगो व्यवच्छेदश्चार्थः ॥ अन्ययोगश्चान्यसमवेतत्वादिरूपस्तेन पृथि
व्यामेव गंध इत्यादौ गंधे पृथिवीसमवेतत्वं पृथिव्यन्यसमवेतत्वव्यवच्छेदश्च ॥ वन्हिम
त्येव धूम इत्यादौ धूमे वन्हिमदन्यसंयुक्तत्वव्यवच्छेदः प्रतीयते ॥ एवं घटत्वाभाववत्येव ।

द्रव्यत्वाभाव इत्यादौ घटत्वाभाववद्विशेषणत्व घटत्वाभाववद्विशेषणत्वाभाववद्वेत्यादि
स्वयमूहनीयं ॥ न च पृथिव्यामेवेत्यादौ पृथिव्याः सप्तम्यर्थविशेषणतयोपस्थितत्वे न कथ
मेवकारार्थेऽन्वयः ॥ एकविशेषणत्वेनोपस्थित[illegible]स्यान्यत्र विशेषणत्वेनान्वया ।
योगात् । अन्यथा वन्हिमान्नास्तीत्यादौ मतुबर्थविशेषणतयोपस्थितस्य वन्ह्यादेरभा
वविशेषणत्वेनान्वया[illegible]पत्त्या वन्हिर्नास्तीत्यन्वयबोधापत्तेरिति वाच्यं एवकार
समभिव्याहृतव्युत्पत्तिभेदनियंत्रितव्युत्पत्तिभेदे न तादृशान्वयबोधस्वीकारेप्यति
प्रसंगाभावात् ॥ एवं पदार्थः पदार्थेनान्वेति ॥ न तु पदार्थैकदेशेनेति व्युत्पत्तेरेवकारस्थ
लेसंकोचः ॥ अन्यथा पृथिव्यामेवेत्यादौ पृथिव्यादेः ॥ पदार्थैकदेशस्य एवकारार्थेऽन्य
त्वेनऽन्वयप्रसंगात् ॥ तथा एकपदोपस्थापितयोर्विशेष्यविशेषणभावेनान्वयबो

ए॰वा॰
९

धेऽव्युत्पन्नः॥ अन्यथा मृग इत्यादिपदात् पश्य हरिणा इत्यादिबोधप्रसंगात्॥ तथा च कथ-
मेवकारार्थयोर्विशेष्यविशेषणभावेनान्वयबोध इति चेत् मृगपदादौ तथाव्युत्पत्तिस्वी-
कारेऽपि एवकारस्थले तथाव्युत्पत्तेरनंगीकारात्॥ पक्षधरमिश्रास्तु व्यवच्छेदमात्रमेवका-
रार्थः॥ पृथिव्यन्यसमवेतत्वादौ समस्यादीनामेवकारस्य लक्षणेत्याहुः॥ वस्तुतस्तु अ-
न्यव्यवच्छेदस्यात्यंताभावोऽन्योन्याभावश्च पृथिव्यामित्यादौ पृथिव्यां गंध इत्यत्र पृथिव्यन्य-
स्मिन् गंधाभावश्च शंखः॥ पांडर एवेत्यादौ शंखः॥ तादात्म्येन पांडरः॥ शंखान्यस्मिन्
पांडरान्योन्याभावश्च पार्थ एव धनुर्धर इत्यादौ पार्थस्तादात्म्येन धनुर्धरः॥ पार्थान्यस्मिन्
धनुर्धरव्यवच्छेदश्च प्रतीयते॥ एवं ज्ञानमर्थं गृह्णात्येवेत्यादौ [illegible] आख्यातस्याश्रये ल-
क्षणया ज्ञानत्वाव्यवच्छेदेनार्थनिरूपितविषयितासंबंधान्यत्वव्यवच्छेदः॥ स्वरूपं पृथि-

राम
१०